| अथालङ्कारनामानि | तल्लक्षणानि | तदुदाहरणानि |
|---|---|---|
| भेदकातिशयोक्तिः —— ६८ | "भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्वकल्पनं" । ६८ | "अन्यदेवास्य गाम्भीर्य्यमन्यद्धैर्य्यञ्च भूपतेः" ॥ ६८ |
| भ्रान्तापह्नुतिः —— ६९ | "भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे" । ६९ | "तापं करोति सोत्कम्पं ज्वरः किन्नु सखे स्मरः" ॥ ६९ |
| भ्रान्तिमान् —— ७० | "स्यात् स्मृतिर्भ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयं" । ७० | "अयं प्रमत्तो मधुपस्त्वन्मुखं वेत्ति पङ्कजं" ॥ ७० |
| मालादीपकं —— ७१ | "दीपकैकावलीयोगान्मालादीपकमुच्यते" । ७१ | "स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः" ॥ ७१ |
| मिथ्याध्यवसितिः —— ७२ | "किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं" ।७२ | "मिथ्याध्यवसितिर्व्वेश्यां वशयेत् खस्रजं वहन्" ॥ ७२ |
| मीलितं —— ७३ | "मीलितं यदि सादृश्याद्भेद एव न दृश्यते" । ७३ | "रसो नालक्षि लाक्षायाश्चरणे सहजारुणे" ॥ ७३ |
| मुद्रा —— ७४ | "सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः" । ७४ | "नितम्बगुर्व्वी तरुणी दृग्युग्मविपुला च सा" ॥ ७४ |
| यथासंख्यं —— ७५ | "यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः" । ७५ | "शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय" ॥ ७५ |
| यमकं —— ७६ | "सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।<br>क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते" । ७६ | "नवपलाशपलाशवनं पुरःस्फुटपरागपरागतपङ्कजं ।<br>मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः" ॥ ७६ |
| युक्तिः —— ७७ | "युक्तिः पराभिसन्धानं क्रियया मर्म्मगुप्तये" । ७७ | "त्वामालिखन्ति दृष्टान्यां धनुः पौष्पं करेऽलिखत्" ॥ ७७ |
| रत्नावली —— ७८ | "क्रमिकाप्रकृतार्थानां न्यासं रत्नावलीं विदुः" । ७८ | "चतुरास्यः पतिर्लक्ष्म्याः सर्व्वज्ञस्त्वं महीपते" ॥ ७८ |
| रूपकं —— ७९<br>तत् द्विविधं । अभेदरूपकं । ताद्रूप्यरूपकञ्च । तच्च समन्यूनाधिक्यकथनद्वारा प्रत्येकं त्रिविधं । समाभेदरूपकं । न्यूनाभेदरूपकं । अधिकाभेदरूपकं । समताद्रूप्यरूपकं । न्यूनताद्रूप्यरूपकं । अधिकताद्रूप्यरूपकं । एतेन षड्विधं । | "विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत्" ।<br>"रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः" ॥ ७९ | "अयं हि धूर्ज्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् ।<br>अयमास्ते विना शम्भुस्तार्त्तीयिकं विलोचनं ॥<br>शम्भुर्व्विश्वमवत्यद्य स्वीकृत्य समदृष्टितां ।<br>अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ॥<br>साध्वीयमपरा लक्ष्मीरसुधासागरोत्थिता ।<br>अयं कलङ्किनश्चन्द्रान्मुखचन्द्रोऽतिरिच्यते" ॥ ७९ |
| रूपकातिशयोक्तिः —— ८० | "रूपकातिशयोक्तिः स्यात् निगीर्य्याध्यवसानतः" । अस्यार्थः । विषयसम्बन्धेन उल्लेखनं विना विषयिवाचकशब्देन ग्रहणं विषयनिगरणं तत्पूर्ब्बकं विषयस्य विषयिरूपतया अध्यवसानं तस्मिन् सति रूपकातिशयोक्तिः" । ८० | पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति सिताः शराः" ॥ ८० |
| ललितं —— ८१ | "प्रस्तुते वर्ण्यवाक्यार्थप्रतिविम्बस्य वर्णनं" । ८१ | "ललितं निर्गते नीरे सेतुमेषा चिकीर्षति" ॥ ८१ |
| लुप्तोपमा —— ८२<br>सा चाष्टधा । वाचकलुप्ता । धर्म्मलुप्ता । उपमानलुप्ता । धर्म्मवाचकलुप्ता । वाचकोपमेयलुप्ता । वाचकोपमानलुप्ता । धर्म्मोपमानलुप्ता । धर्म्मोपमानवाचकलुप्ता । | "वर्ण्योपमानधर्म्माणामुपमावाचकस्य च ।<br>एकद्वित्र्यनुपादानात् भिन्ना लुप्तोपमाष्टधा" ॥ ८२ | "तड़िद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्म्मम ।<br>कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ॥<br>यत् त्वया मेलनं तत्र लाभो मे यश्च तद्रतेः ।<br>तदेतत् काकतालीयमवितर्क्कितसम्भवं" ॥ ८२ |
| लेशः —— ८३ | "लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनं" । ८३ | "अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।<br>"शुक पञ्जरबन्धस्ते मधुराणां गिरां फलं" ॥ ८३ |
| लोकोक्तिः —— ८४ | "लोकप्रवादानुकृतिं लोकोक्तिरिति कथ्यते" । ८४ | 'सहस्व कतिचिन्मासान्मीलयित्वा विलोचने" ॥ ८४ |
| वक्रोक्तिः —— ८५ | "वक्रोक्तिः श्लेषकाकुभ्यामपूर्व्वार्थप्रकल्पनं" । ८५ | "मुञ्च मानं दिनं प्राप्तं नेह नान्दी हरान्तिके" ॥ ८५ |
| विकल्पः —— ८६ | "विरोधे तुल्यबलयोर्व्विकल्पालङ्कृतिर्म्मता" । ८६ | "सद्यः शिरांसि चापान् वा नमयन्तु महीभुजः" ॥ ८६ |
| विकस्वरः —— ८७ | "यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः" ।८७ | "स न जिग्ये महान्तो हि दुर्द्धर्षाः सागरा इव" ॥ ८७ |
| विचित्रं —— ८८ | "विचित्रं तत्प्रयत्नश्चेत् विपरीतफलेच्छया" । ८८ | "नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिं" ॥ ८८ |
| विधिः —— ८९ | "सिद्धस्यैव विधानं यत्तामाहुर्व्विध्यलङ्कृतिं" । ८९ | "पञ्चमोदञ्चने काले कोकिलः कोकिलोऽभवत्" ॥ ८९ |
| विनोक्तिः —— ९०<br>लक्षणभेदेन सा द्विविधा । | "विनोक्तिः स्याद्विना किञ्चित् प्रस्तुतं हीनमुच्यते ।<br>तच्चेत् किञ्चिद्विना रम्यं विनोक्तिः सापि कथ्यते" ॥ ९० | "विद्या हृद्यापि सा विद्या विना विनयसम्पदं ।<br>विना खलैर्व्विभात्येषा राजेन्द्र भवतः सभा" ॥ ९० |
| विभावना —— ९१<br>अस्या लक्षणान्युदाहरणानि च षट् । | "विभावना विनापि स्यात्कारणं कार्य्यजन्म चेत् ।<br>हेतूनामसमग्रत्वे कार्य्योत्पत्तिश्च सा मता ॥<br>कार्य्योत्पत्तिस्तृतीया स्यात् सत्यपि प्रतिबन्धके ।<br>अकारणात् कार्य्यजन्म चतुर्थी स्याद्विभावना ॥<br>विरुद्धात् कार्य्यसम्पत्तिर्दृष्टा काचिद्विभावना ।<br>कार्य्यात् कारणजन्मापि दृष्टा काचिद्विभावना" ॥ ९१ | "अपलाक्षारसासिक्तं रक्तं ते चरणद्वयं ।<br>अस्त्रैरतीक्ष्णकठिनैर्ज्जगज्जयति मन्मथः ॥<br>नरेन्द्रानेव ते राजन् दशत्यसिभुजङ्गमः ।<br>शङ्खाद्वीणानिनादोऽयमुदेति महदद्भुतः ॥<br>शीतांशुकिरणास्तन्वीं हन्त सन्तापयन्ति तां ।<br>यशःपयोराशिरभूत् करकल्पतरोस्तव" ॥ ९१ |
| विरोधः —— ९२<br>स दशधा । | "जातिश्चतुर्भिर्ज्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।<br>क्रियाक्रियाद्रव्याभ्यां यत् द्रव्यं द्रव्येण वा मिथः ।<br>विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः" ॥ ९२ | "तव विरहे मलयमरुद्दावानलः शशिरुचोऽपि शोषमणिः । हृदयमनिरुतमपि भिन्ते नलिनीदलमपि निदाघरविरस्याः ॥ सन्ततमुषलासङ्गाद्बहुतरगृहकर्म्मघटनाया नृपते । द्विजपत्नीनां |